# S-III/6/2231B/21

## षष्ठसत्रार्द्धम्

## षष्ठपत्रम्

## अद्वैतवेदान्तः

समयः घण्टात्रयम् पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. ईश्वरस्य द्वे प्रकृती के?

2. क्षेत्राध्यायः कुतः आरभ्यते?

3. किं क्षेत्रम्? कः क्षेत्रज्ञः?

4. किं नाम अमानित्वम्?

5. अध्यात्मज्ञानं नाम किम्?

**अथवा**

कार्यकरणकर्तृत्वे हेतुः कः?

6. पुरुषः कथं प्रकृतिजान् गुणान् भुङ्क्ते?

7. प्रकृतिसम्भवाः गुणाः के?

8. सत्त्वस्य लक्षणं किम्?

**अथवा**

सत्त्वं विवृद्धमिति कदा विद्यात्?

9. सुकृतस्य कर्मणः किं फलम्?

**अथवा**

सत्त्वात् किं सञ्जायते?

10. कः ब्रह्मभूयाय कल्पते?

11. अश्वत्थस्य पर्णानि कानि?

**अथवा**

पञ्चदशाध्यायस्य नाम किम्?

12. के अव्ययं पदं गच्छन्ति ?

13. जीवः कस्य अंशः ?

14. लोके द्वौ पुरुषौ कौ ?

15. का दैवी सम्पत् ?

**अथवा**

लोके द्वौ भूतसर्गौ कौ ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. क्षेत्रस्य स्वरूपं ग्रन्थोक्तदिशा विचारयत।

17. 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' इत्यस्य भाष्योक्तरीत्या व्याख्यानं कुरुत।

**अथवा**

'सर्वेन्द्रियगुणाभासं. . . . .' श्लोकं प्रपूर्य व्याख्यात।

18. 'य एवं वेत्ति. . . . .' श्लोकं प्रपूर्य व्याख्यात।

**अथवा**

'समं सर्वेषु भूतेषु. . . . .' श्लोकस्य तात्पर्यं लिखत।

19. 'प्रकाशं च प्रवृत्तिं च. . . . . .' श्लोकं यथाभाष्यं व्याख्यात।

**अथवा**

सत्त्वादीनां गुणानां लक्षणं ग्रन्थदिशा स्पष्टयत।

20. 'ऊर्ध्वमूलमधःशाखं. . . . .' यथाभाष्यं व्याख्यात।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।**

21. क्षेत्रक्षेत्रज्ञस्वरूपमुक्त्वा ईश्वरस्य संसारित्वं निराकुरुत। (1×20=20)

**अथवा**

'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इत्यस्य यथाभाष्यं तात्पर्यं स्पष्टयत।

**अथवा**

चतुर्दशाध्यायस्य सारं लिखत।